# Devaih Krita Antarmaya Stuti

# દેવૈઃ કૃતા અન્તર્માયાસ્તુતિઃ

## Document Information

Text title : Devaih Krita Antarmaya Stuti

File name : antarmAyAstutiHdevaiHkRRitA.itx

Category : devii, stuti

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : Kalikapurana Adhyaya 24 shloka 9-27

Latest update : January 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2022

*sanskritdocuments.org*

# દેવૈઃ કૃતા અન્તર્માયાસ્તુતિઃ

દેવા ઊચુઃ -
શ્રીશક્તિઃ પાવની તાન્તુ પુષ્ટિં પરમનિષ્કલામ્ ।
વયં સ્તુમો મહાભક્ત્યા મહદવ્યક્તરૂપિણીમ્ ॥ ૯॥

શિવાં શિવકરીં શુદ્ધાં સ્થૂલાં સૂક્ષ્માં પરાવરામ્ ।
અન્તર્વિદ્યામવિદ્યાખ્યાં પ્રીતિમેકાગ્રયોગનીમ્ ॥ ૧૦॥

ત્વં મેધા ત્વં ધૃતિસ્ત્વં હ્રીસ્ત્વમેકા સર્વગોચરા ।
ત્વં દીધિતિઃ સૂર્યગતા સુપ્રપઞ્ચપ્રકાશિની ॥ ૧૧॥

યા તુ બ્રહ્માણ્ડસંસ્થાનં જગદ્બીજેષુ યા જગત્ ।
આપ્યાયયતિ બ્રહ્માદીંસ્તમ્બાન્તાન્ યા ત્વમાપગા ॥ ૧૨॥

ય એકઃ સર્વજગતાં પ્રાણભૂતઃ સદાગતિઃ ।
દેવાનાઞ્ચ ય આધારઃ સ નભસ્વાંસ્તવાંશકઃ ॥ ૧૩॥

એવં વિસારિ યત્તેજઃ સર્વત્રૈવ સમિધ્યતે ।
તત્તે રૂપં જગદ્બીજં બહુધા યચ્ચ દૃશ્યતે ॥ ૧૪॥

યા બ્રહ્મલોકપાતાલસાન્તરાલગતા સદા ।
સા ત્વં વિયન્મધ્યબહિર્બ્રહ્માણ્ડસ્ય ચ સર્વતઃ ॥ ૧૫॥

અચલાચલચક્રેણ યન્ત્રિતા યા પ્રપઞ્ચસૂઃ ।
જગદ્ધાત્રી લોકમાતા સા ચ ત્વં માધવી ક્ષિતિઃ ॥ ૧૬॥

ત્વં બુદ્ધિસ્ત્વં તદ્વિષયા ત્વં માતા છન્દસાં ગતિઃ ।
ગાયત્રી ત્વં વેદમાતા ત્વં સાવિત્રી સરસ્વતી ॥ ૧૭॥

ત્વં માતા સર્વજગતાં ત્વં ત્રયી કામરૂપિણી ।
ત્વં હિ નિદ્રાસ્વરૂપેણ પ્રાણિનો નિર્જરાદયઃ ।
યે સ્વર્ગાધોકસઃ સર્વાન્ સુખયન્તી પ્રમોહસિ ॥ ૧૮॥

ત્વં લક્ષ્મીઃ પુણ્યકર્ત્રીણાં પાપિનાં ત્વં હિ યાતના ।
તથા નીતિભૃતાં શ્રીશ્ચ સુખદાનૈશિકી ધૃતિઃ ॥ ૧૯॥

ત્વં શાન્તિઃ સર્વજગતાં ત્વં કાન્તિશ્ચન્દ્રગોચરા ।
ત્વં ધાત્રી સર્વભૂતાનાં લક્ષ્મીસ્ત્વં વિષ્ણુમોહિની ॥ ૨૦॥

ત્વં તત્ત્વરૂપા ભૂતાનાં પઞ્ચાનામપિ સારકૃત્ ।
ત્વં ત્રિલોકી મહામાયા ત્વં નીતિર્મોહકારિણી ॥ ૨૧॥

સંસારચક્રેષ્વારોપ્ય સર્વભૂતં મહેશ્વરઃ ।
ભ્રામયન્નસ્તિ ચ યથા સા ત્વં માયા મહેશ્વરિ ॥ ૨૨॥

જયન્તી જયયુક્તાનાં હ્રીર્વિધા નીતિરુત્તમા ।
ગીતિસ્ત્વં સામવેદસ્ય ગ્રન્થિસ્ત્વં યજુષાં હુતિઃ ॥ ૨૩॥

સમસ્તગીર્વાણગણસ્ય શક્તિસ્તમોમયી સત્ત્વગુણૈકદૃશ્યા ।
રજઃપ્રપઞ્ચાનુભવૈકકારિણી યા ન સ્તુતા ભવ્યકરીહ સાસ્તુ ॥ ૨૪॥

સંસારસાગરકરાલતરઙ્ગદુઃખનિસ્તારકારિતરણિશ્ચિતિરીતિહીના ।
યાષ્ટાઙ્ગરૂપપરપાવનકેલિગીતવિક્ષેપકારિણી ગિરૌ પ્રણનામ તાં વૈ ॥ ૨૫॥

નાસાક્ષિવક્ત્રભુજવક્ષસિ માનસે ચ
  ધૃત્વા સુખાનિ વિદધાતિ સદૈવ જન્તોઃ ।
નિદ્રેતિ યાતિ સુભગા જગતીભવાનાં
  સા નઃ પ્રસીદતુ ધૃતિસ્મૃતિવૃત્તિરૂપા ॥ ૨૬॥

સૃષ્ટિસ્થિત્યન્તરૂપા યા સૃષ્ટિસ્થિત્યન્તકારિણી ।
સૃષ્ટિસ્થિત્યન્તશક્તિર્યા સા માયા નઃ પ્રસીદતુ ॥ ૨૭॥

ઇતિ કાલિકાપુરાણે ચતુર્વિંશાધ્યાયાન્તર્ગતા
  દેવૈઃ કૃતા અન્તર્માયાસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*Devaih Krita Antarmaya Stuti*

pdf was typeset on January 15, 2022

Please send corrections to *sanskrit@cheerful.com*